# गणपति प्रार्थना

## *gaṇapati prārthanā*

गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम् ।

*gaṇānāṁ tvā gaṇapatigṁ havāmahe kaviṁ kavīnāmupamaśravastamam ||*

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥

*jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ śṛṇvannūtibhissīda sādanam ||*

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥

*pra ṇo devī sarasvatī vājebhirvājinīvatī | dhīnāmavitryavatu ||*

गणेशाय नमः । सरस्वत्यै नमः । श्रीगुरुभ्यो नमः । हरिः ॐ ॥

*gaṇeśāya namaḥ | sarasvatyai namaḥ | śrīgurubhyo namaḥ | hariḥ om ||*